# नवरत्नमालिका स्त्रोत्रं

हारनूपुरकिरीटकुंडल विभूषितावयवशोभिनीं
कारणेशवरमौलिकोटि परिकल्प्यमानपदपीठिकाम् ।
कालकालफ़णिपाशबाण धनुरंकुशां अरुणमेखलां
फ़ालभूतिलकलोचनां मनसि भावयामि परदेवताम् ॥ 1

गंधसारघनसारचारु नवनागवल्लिरसवासिनीं
सांध्यरागमधुराधराभरण सुंदराननशुचिस्मिताम् ।
मंदरायतविलोचनाममल बालचंद्रकृतशेखरीं
इंदिरारमणसोदरीं मनसि भावयामि परदेवताम् ॥ 2

स्मेरचारुमुखमंडलां विमलगंडलम्बिमणिमंडलां
हारदामपरिशोभमानकुच भारभीरुतनुमध्यमाम् ।
वीरगर्वहरनूपुरां विविधकारणेशवरपीठिकां
मारवैरिसहचारिणीं मनसि भावयामि परदेवताम् ॥ 3

भूरिभारधरकुंडलींद्रमणि बद्धभूवलयपीठिकां
वारिराशिमणिमेखलावलयवह्निमंडलशरीरिणीम् ।
वारिसारवहकुंडलां गगनशेखरीं च परमात्मिकां
चारुचंद्रविलोचनां मनसि भावयामि परदेवताम् ॥ 4

© 2022 Vedam Nadam

कुंडलत्रिविधकोणमंडलविहारषड्दलसमुल्लसत्
पुंडरीकमुखभेदिनीं च प्रचंडभानुभा समुज्ज्वलाम् ।
मंडलेंदुपरिवाहितामृत तरंगिणीं अरुणरूपिणीं
मंडलांतमणिदीपिकां मनसि भावयामि परदेवताम् ॥ 5

वारणाननमयूरवाहमुख दाहवारणपयोधरां
चारणादिसुरसुंदरीचिकुर शेकरीकृतपदाम्बुजाम् ।
कारणाधिपतिपंचकप्रकृति कारणप्रथममातृकां
वारणांतमुखपारणां मनसि भावयामि परदेवताम् ॥ 6

पद्मकांतिपदपाणिपल्लवपयोधराननसरोरुहां
पद्मरागमणिमेखलावलय नीविशोभितनितम्बिनीम् ।
पद्मसम्भवसदाशिवांतमय पंचरत्नपदपीठिकां
पद्मिनीं प्रणवरूपिणीं मनसि भावयामि परदेवताम् ॥ 7

आगमप्रणवपीठिकाममल वर्णमंगलशरीरिणीं
आगमावयवशोभिनीमखिल वेदसारकृतशेखरीम् ।
मूलमंत्रमुखमंडलां मुदितनादबिंदु नवयौवनां
मातृकां त्रिपुरसुंदरीं मनसि भावयामि परदेवताम् ॥ 8

© 2022 Vedam Nadam

कालिकातिमिरकुंतलांतघन भृंगमंगलविराजिनीं
चूलिकाशिखरमालिकावलय मल्लिकासुरभिसौरभाम् ।
वालिकामधुरगंडमंडल मनोहराननसरोरुहां
कालिकामखिलनायिकां मनसि भावयामि परदेवताम् ॥ 9

नित्यमेव नियमेन जल्पतां
भुक्तिमुक्तिफ़लदामभीष्टदाम् ।
शंकरेण रचितां सदा जपे-
न्नामरत्ननवरत्नमालिकाम् ॥ (2) 10

॥ इति श्रीमच्छंकरभगवतः कृतौ
नवरत्नमालिका स्त्रोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam